१८०

लघुजातकस्यपुस्तकमिदंपत्र १५

1

॥श्रीगणेशायनमः ॥ ७ यस्योदयास्तसमयेसुरमुकुटनिघृष्टचरणकमलोपि ॥ कुरुतें
जलिंत्रिणेत्रः सजयतिधाम्नांनिधिःसूर्यः ॥ १ ॥ होराशास्त्रंवृत्तैर्मयानिबद्धंनिरीक्ष्यशास्त्रा
णि ॥ यत्तस्याप्यार्याभिःसारमहंसंप्रवक्ष्यामि ॥ २ ॥ यदुपचितमन्यजन्मनिशुभाशुभंतस्य
कर्मणःप्राप्तिं ॥ व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणिदीपइव ॥ ३ ॥ शीर्षमुखबाहुहृदयोदरा
णिकटिबस्तिगुह्यसंज्ञानि ॥ ऊरूजानूजंघेचरणाविति राशयोऽजाद्याः ॥ ४ ॥ कालनरस्याव
यवान्पुरुषाणांचिंतयेत्प्रसवकाले ॥ सदसद्ग्रहसंयोगात्पुष्टासोपद्रवाश्चैव ॥ ५ ॥ अरुणसि
तहरितपाटलपांडुविचित्रसितेतरपित्रांगा ॥ पिंगलकर्बुरबभ्रुकमलिनारुचयोयथासंख्यं
॥ ६ ॥ पुंस्त्रीक्रूराक्रूरौचरस्थिरद्विःस्वभावसंज्ञाश्च ॥ अजवृषमिथुनकुलीराःपंचमन
वमैःसहैंद्राद्याः ॥ ७ ॥ कुजशुक्रज्ञेंद्वर्कज्ञशुक्रकुजजीवसौरियमगुरवः ॥ मेषाः नवांशाका

नामृगजमकरतुलाकुलीराद्याः ॥ ८ ॥ स्वगृहाद्द्वादशभागा द्रेष्काणाः प्रथमपंचनवपानां होरे
विषमेऽर्केन्द्वोः समराशौ चंद्रतीक्ष्णांश्वोः ॥ ९ ॥ कुजयमजीवज्ञसिताः पंचेंद्रियवसुमुनींद्रियांशा
नां विषमेषु समर्क्षेष्वृत्क्रमेण त्रिंशांशाः कल्प्याः ॥ १० ॥ नरचतुष्पदकीटाप्याबलिनः प्राग्द
क्षिणापरोत्तरगाः संध्यासु रात्रिबलिनः कीटनरचतुष्पदाश्चैवं ॥ ११ ॥ मेषवृषधन्विसिंहाश्च
तुष्पदाः मकरपूर्वभागश्च कीटः कर्कटराशिः सरिसृपो वृश्चिकः कथितः ॥ १२ ॥ मकरस्यप
श्चिमार्द्धं कुंभोमीनश्च जलचराख्याताः मिथुनतुलाधरकन्या द्विपदाख्याः धनुषिपू
र्वभाग ॥ १३ ॥ अधिपयुतो दृष्टो वा बुधजीवज्ञानीक्षितश्च यो राशिः स भवति बलवान्न
यदा दृष्टो युक्तो पि वा शेषैः ॥ १४ ॥ तनुधनसहजसुहृत्सुतरिजायामृत्युधर्मकर्मायाः
व्ययइति लग्नाद्भावाश्चतुरस्राख्येष्टमचतुर्थे ॥ १५ ॥ पातालहिबुकसुखवेश्मबंधुसं

शश्चतुर्थभवनस्य । नवपंचमं त्रिकोणं नवमर्क्षं त्रित्रिकोणं च ॥१६॥ धीः पंचमं तृ
तीयं दुश्चिक्यं सप्तमं तु जामित्रं । घूनं द्यूनं च तच्छिद्रं मष्टमं द्वादशं रिःफं ॥१७॥ केंद्रं च
तुष्टयं कंटकं चतुर्ग्रामास्तदशमचतुर्थानां संज्ञाः परतः पणफर मापोक्लिमं च तत्परत
श्च ॥१८॥ त्रिषडेकादशदशमान्युपचयभवनान्यतोन्यथान्यानि । वर्गोत्तमान वांशा
श्चरादिषु प्रथममध्यमांताः ॥१९॥ मेषाद्याश्चत्वारः सधन्विमकराः क्षपाबला ज्ञेयाः ।
पृष्ठोदया विमिथुनाः शिरसान्ये ह्युभयतो मीनः ॥२०॥ अजवृषभमृगांगनाकुलीरमीनव
णिजोंशकेष्विनाद्युच्चाः दशशिख्यष्टाविंशतितिथींद्रियत्रिघनविंशेषु ॥२१॥ उच्चान्नीचं
सप्तमं कीदीनां त्रिकोण संज्ञाः स्युः । सिंहवृषाजप्रमदाः कार्मुकभृत्तौलिकुंभधराः
॥२२॥ नखा २० ग्नि ३ रवि १२ बाणेंदु १५ नख २० भा २७ ग ७ गास्त्रिकोणान्यर्कमुखानां ।

२३ ग्रहहोराद्रेष्काणद्वादशांशत्रिंशांशनवांशभेदैश्च वर्गप्रयेतश्यो ग्रहस्य योयस्य निर्दिष्टः
२४ इति श्री वराहमिहिराचार्यविरचिते लघुजातके राशिप्रभेदाध्यायः प्रथमः ७ ॥ १ ॥
अथ ग्रहयोनिप्रभेदाध्यायः ॥ प्राच्यादीशा रविसितकुजराहुयमेंदुसौम्यवाक्पतयः क्षी
णेंदुर्कयमाराः पापास्तैः संयुतः सौम्यः ॥ १ ॥ क्लीबपती बुधसौरी चंद्रसितौ योषितां नराणां शे
षाः ऋगथर्वसामयजुषामधिपा गुरुसौम्यभौमसिताः ॥ २ ॥ जीवसितौ विप्राणां छत्रस्यारो
ष्णगू विशां चंद्रः शूद्राधिपः शशिसुतः शनैश्चरः संकरभवानां ॥ ३ ॥ बलवान्मित्रस्व
गृहोच्चनवांशेष्वीक्षितः शुभैश्चापि चंद्रसितौ स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः ॥ ४ ॥ प्रा
च्यां दिशि जीवबुधौ सूर्यारौ भास्करिः शशांकसितौ उदगयने शशिसूर्यौ वक्रे न्ये स्नि
ग्धविपुलाश्च ॥ ५ ॥ अहनि सिताकर्गुरवो ज्याः द्युनिसि शशिनक्तमिंदुकुजसौराः स्वदिनादि

॥३॥

स्यशुभाशुभाः बहुलेतरपक्षयोर्बलिनः ॥६॥ मंदारसौम्यवाक्पतिसितचंद्रार्काः यथोत्त
रं बलिनः ॥ नैसर्गिकबलमेतद्बलसाम्येस्यादधिकचिंताः ॥७॥ मित्रक्षेत्रे स्वोच्चे स्वस्मि
न्नभवने त्रिकोणगे स्वीये ॥ द्रेष्काणे होरायां स्वांशे स्वदिने बलान्विताः सर्वे ॥८॥ दशमतृ
तीये नवपंचमे चतुर्थाष्टमे कलत्रे च ॥ पश्यंति पादवृद्ध्या फलानि चैवं प्रयच्छंति ॥९॥
पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः ॥ चतुरस्रं भूमिसुतः सितार्कबु
धहिमकराः कलत्रं च ॥१०॥ मित्राण्यर्कज्जीवोऽस्य गुरुः ससितौ विभास्कराविंदुजाः ॥ वी
हकी विधुकुजरवींदवभ्यकेषांचिदरयोन्ये ॥११॥ शत्रू मंदसितौ समश्च शशिजो मित्राणि
शेषा रवेस्तीक्ष्णांशुर्हिमरश्मिजश्च सुहृदौ शेषाः समाः शीतगोः ॥ जीवेंदूष्णकराः कुज
स्य सुहृदो ज्ञोरिः सितार्की समौ मित्रे सूर्यसितौ बुधस्य हिमगुः शत्रुः समाश्चापरे ॥१२॥

सूरेः सौम्यसितावरी रविसुतो मध्योपरेत्वन्यथा सौम्यार्की सुहृदौ समौ कुजगुरू शुक्रस्य शेषावरी शुक्रज्ञौ सुहृदौ समः सुरगुरुः सौरस्य चान्येरयस्तत्कालेच दशायबंधुसहजस्वांतेषु मित्रं स्थिताः १३ मित्रमुदासीनोरिर्व्याख्याता ये निसर्गभावेन॥ ते धिसुहृन्मित्रसमास्तत्कालानुपास्थिताश्चिंत्याः १४ मूलत्रिकोण५ षष्ठ६ त्रिकोण९ निधने८ कराशि१ सप्तम७ गाः एवैतस्य यथासंख्यं संभवंति तत्कालिकाः अमी रिपवः १५ चतुरस्रो नात्युच्चस्तनुकेशः पैत्तिकोऽस्थिसारश्च रक्तरो मधुपिंगाक्षो रक्तः श्यामः पृथुश्चार्कः १६ स्वक्षः प्रांशुर्गोरश्चपलः कफवातिको रुधिरसारश्च मृदुवाग्घृणी प्रियसखस्तनुवृत्तश्चंद्रमाः प्रांशुः १७ ह्रस्वोऽतिस्वरस्तरुणः पिंगाक्षः पैत्तिको दुराधर्षः चपलः सरक्तगौरो मज्जासारश्च माहेयः १८ मध्यमरूपः प्रियवाक् दूर्वाश्यामः शिरातनो निपुणः त्वक्सारस्त्रिस्थूणः सततं

४

स्पष्टश्चैंद्रसुतः ॥ १९ ॥ मधुनिभनयनो मतिमानुपचितमांसः कफात्मको गौरः ॥ इषसिं
गेलकेशोमेदः शारोगुरुर्दीर्घः ॥ २० ॥ श्यामोविश्लिष्टपर्वा कुटिलासितमूर्द्धजः सुखी कां
तः कफवातिकोमधुरवाक्शुक्रः शुक्रसारश्च ॥ २१ ॥ क्रशोदीर्घः पिंगाक्षः क्रष्णः
पिशुनोलसोनिलप्रकृतिः ॥ स्थूलनखदंतरोमा शनैश्चरः स्नायुशारश्च ॥ २२ ॥ इ
ति वराहमिहरविरचितायां लघुजातके ग्रहयोनिप्रभेदाध्यायो द्वितीयः ॥ २ ॥ ७ ॥ ७ ॥
अथ आधानाध्यायः ॥ आधानस्त्रगृहं यत्ते छीलोमैथुने पुमान्भवति ॥ सायासमस
द्युतवीक्षिते विदग्धं शुभैरस्तु ॥ १ ॥ सौरांशे आंशे वा चंद्रः सौरान्वितोथ हिबुके वा ॥ शीतो
दीपो जन्मन्याधाने प्रश्नकाले वा ॥ २ ॥ यमवक्रौ घ्नेकीस्तु सोरोगमथो स्त्रियाश्चेज्ञा
त ॥ तन्मध्यगयोर्मृत्युस्तदेकयुतदृष्टयोश्चैवं ॥ ३ ॥ कललघनावयवास्थित्वयोमस्म

४

रा १

तिसमुद्भवाः क्रमशः ॥ मान्देशुक्रकुजजीवसूर्यचंद्रार्किसौम्यानां ४ अस्तानोद्वेगः प्रस
वाः परतो लग्नेशाचंद्रसूर्याणां कलुषैः पीडापतनं निपीडिते निर्मलैः पुष्टिः ५ बलयुक्तौ
स्वगृहांशेष्वर्कसितावुपचयर्क्षगौ पुंसां स्त्रीणां वा कुजचंद्रौ यदा तदा संभवतीति गर्भः
६ लग्ने बलिनि गुरौ वा नवपंचमसंस्थितोपि वा भवति योगाः हतबीजाः नामफला वीणे
व बधिराणां ७ लग्नधर्मसुतराशिमुपेते वास्यतो दनुजराजगुरौ वा पुत्रकाममुदयेथ
निजे वाप्रयत्नी प्रमुदितः समुपयात ८ विषमर्क्षे विषमनवांशसंस्थिताः गुरुशशांकलग्ना
र्काः पुंजन्मकराः सममेषु योषितां समनवांशगताः ९ बलिनो विषमेर्कगुरू नरं स्त्रियं स
मगृहेषु कुजेंदुसिताः यमलं द्विशरीरांशेष्विंदुजदृष्ट्या स्वपक्षसमं १० लग्नो द्विषमोप
गतः शनैश्चरः पुत्रजन्मदो भवति निगदितयोगबलाबलमवलोक्य विनिश्चयो वाच्यः

॥ ५ ॥

११ इति श्रीवराहमिहरविरचितायां लघुजातके आधानाध्यायस्तृतीयः ॥ ३ ॥ छ ॥ छ ॥ छ ॥
अथ सूतिकाध्यायः ॥ सत्वं रजस्तमो वा त्रिंशांशो यस्य भास्करस्तादृक् ॥ बलिनः सदृशीमू-
र्त्तिर्बुध्वा वा जातिकुदेशान् ॥ १ ॥ गुरुशशिरवयः सत्वं रजः सितज्ञौ तमोर्कसुतभौमौ एतैं-
तरात्मनः स्वां प्रकृतिं जंतोः प्रयच्छंति ॥ २ ॥ चंद्रे लग्नमपश्यति मध्ये वा सौम्यशुक्रयोश्चंद्रे
जन्म परोक्षस्य पितुर्यमोदये कुजे चास्ते ॥ ३ ॥ पापयुतोर्कः सेंदुः पश्यति होरां न चेंद्रमपि जी-
वः पश्यति सार्कं नेंदुं यदि जीवो वा परैर्जातः ॥ ४ ॥ द्वारं वास्तुनि केंद्रोपगाद्बलाढ्याद्व्राति वा वि-
लग्नर्क्षात् ॥ दीपोर्कादुदयाद्वर्त्तिरिंदुतः स्नेहनिर्देशः ॥ ५ ॥ अदृढं नवमथ दग्धं चित्रं सुदृ-
ढं मनोरमं जीर्णं ॥ गृहमर्कादैर्वीर्यात्प्रतिवेश्मसन्निकृष्टैश्च ॥ ६ ॥ गुरुरुच्चो दशमस्थो द्वि-
त्रिचतुर्भूमिकं करोति गृहं ॥ धनुषि सबले द्विशालं द्विशालमन्ये यमलेषु ॥ ७ ॥

॥ ५ ॥

10

षट्त्रिनवांशाः पादाः खड्गांगान्येतरालभवनानि ॥ विनयत्वं यमलक्ष्मैः पापैस्तत्तुल्या उपधा
तः ८ अर्कादितान्मणिहेमशुक्तिरजतानि मौक्तिकं लोहं वक्तव्यं बलवद्धिः स्वस्थाने
हेमजीवेपि ९ त्रांशिलग्नांतरे संस्थग्रहतुल्याः सूतिकाश्च वक्तव्याः ॥ उदगर्द्धेन्यंतरगाः
बाह्याश्च क्रस्य दृश्यर्द्धे ॥ १० ॥ कुमारिकालग्नशशीबुधभाग्यचरद्वाग्रानिः सूर्यगुरुप्रसूता
स्त्रीकर्कशांभौमसितौ विधत्ते एवं वयः स्यात्सुतषेषु चैवं ॥ ११ ॥ इति श्रीवराहमिहराचा
र्यविरचितायां लघुजातके प्रसूतिकाध्यायश्चतुर्थः ॥ ४ ॥ ६ ॥ ६ ॥ ६ ॥ अथ रिष्टाध्यायः
षष्ठेष्टमे वा चंद्रः सद्योमरणाय पापसंदृष्टाः ॥ मासेन मरणदाः स्युः वर्षैर्मिश्रैस्तदर्द्धेन ॥ १ ॥
राशिवत्सौम्याः पापैर्वक्रिभिरवलोकिता न शुभदृष्टाः ॥ मासेन मरणदाः स्युः पापा स्युर्लो
लग्नपश्चास्ते २ राश्यंतस्थैः पापैः संध्यायां हिममयूखहोरायां ॥ मृत्युः प्रत्येकस्थैः के

॥ ६ ॥

द्रेषु शशांके च पापेभ्यश्च ॥ ३ ॥ चक्रः प्राप्यश्चार्द्ध पापशुभैः कीटभोदये मृत्युः ॥ निधनचतुष्टय
गे वा क्रूरैः क्षीणे शशिनि तूदये ॥ ४ ॥ ससाष्टेन्योदयगे शशिनि सपापेषु भेक्षणाविमुक्ते ॥ न च
कंटके रितकृष्णेर्षु भरस्तदा मृत्युरादेश्यः ॥ ५ ॥ चतुरस्त्रः सप्तमगः पापांतस्थः शशी मरण
दाता ॥ उदयगतो वा चंद्रः स्मरराशिस्थितैः पापैः ॥ ६ ॥ क्षीणेंदौ द्वादशगे लग्नाष्टमरा
सिसंस्थितैः पापैः ॥ सौम्यरहितैश्च केंद्रैः सद्यो मृत्युर्विनिर्देश्यः ॥ ७ ॥ सोपप्लवे शशांके स
क्रूरे लग्नगे कुजेष्टमगे ॥ मृत्युर्मात्रा सार्द्धं चंद्रवदर्के च शास्त्रेण ॥ ८ ॥ लग्नद्वादशनवमैध
नसंस्थितैश्चंद्र सौरिसूर्यारैः ॥ जातस्य भवति मरणं यदि न बलस्युतः पतिर्वचसो ॥ ९ ॥ सु
सुतमदननवांत्यलग्नरंध्रेष्वशुभयुतो मरणाय शीतररिमः ॥ भृगुसुतशशिपुत्रदेव
पूज्यैर्यदि बलिभिः नैयुतो विलोकितो वा ॥ १० ॥ योगे स्थानं गतवति बलिनश्चंद्रे स्वं

वातनुगृहमथवा पापैर्दृष्टे बलवति मरणं वर्षस्यांतेऽखिलमुनिगदितं ॥ ११ ॥ पक्षेसि
ते भवति जन्म यदि क्षपायां कृष्णे तथाहनि शुभाशुभदृष्टमूर्तिः तं चंद्रमा निधनमाशु
गतोपि लग्नाद्रापत्सु रक्षति पितेव शिशुं न हंति ॥ १२ ॥ इति श्री वराहमिहरविरचिता
यां लघुजातके रिष्टाध्यायः पंचमः ५ ७ ७ ७ अथ रिष्टभंगः सर्वानिमानतिब
लः स्फुरदंशुजालो लग्नेस्थितः प्रशमयेत्सुरराजमंत्री एकोबहूनि दुरितानि सुविस्तरा
णि भक्त्या प्रयुक्त इव शूलधरप्रणामः ॥ १ ॥ लग्नाधिपोतिबलवानशुभैरदृष्टः केंद्रस्थि
तैः शुभखगैरवलोक्यमानः मृत्युं विधूय विदधाति सुदीर्घमायुः सार्धं गुणैर्बहुभि
रूर्जितया च लक्ष्म्या ॥ २ ॥ लग्नाद्दष्टेनवस्थेपि बुधगुरुशुक्रद्रेष्काणगश्चंद्रः मृत्युमा
समपि नरं परिरक्षत्येव निर्व्याजं ॥ ३ ॥ चंद्रः संपूर्णतनुः सौम्येक्षितः शुभस्यांशो प्रव

शेषरिष्टभंगं विशेषतः शुभसंदृष्टः ॥४॥ बुधभार्गवजीवानामेकतरः केंद्रमागतो बलवान्
यद्यक्रूरसहायः सद्यो रिष्टस्य भंगाय ॥५॥ रिपुभवनगतोपि शशी गुरुसितचंद्रात्मजाः
स्त्रिकोणेस्थः अंगद इव भोगिदष्टे रक्षस्येवैष निर्व्याजं ॥६॥ सौम्यद्वयांतरगतः संपूर्णः
स्निग्धमंडलः शशांकः ॥ निःशेषारिष्टहंता भुजंगलोकस्य गरुड इव ॥७॥ शशांकसं
पूर्णशरीरे शुक्लपक्षे निशाभवे काले ॥ रिपुनिधनस्थमरिष्टं प्रभवति नैवात्र जातस्य
॥८॥ प्रस्फुरितकिरणजाले स्निग्धामलमंडले बलोपेते ॥ सुरमंत्रिणि केंद्रगते सर्व
रिष्टं क्षयमुपैति ॥९॥ सौम्यभवनोपयाताः सौम्यांशकसंभवास्त्रिकोणस्थाः गुरु
चंद्रकाव्यशशिजाः सर्वे रिष्टप्रहंतारः ॥१०॥ चंद्राध्यासितराशेः केंद्रे शुभग्रहो वा
पि प्रशमयति रिष्टभंगं पापानि यथा हरिस्मरणात् ॥११॥ पापा यदि शुभवर्गे सौ

सौम्यैर्दृष्टाः शुभाश्चावर्गस्थः निघ्नंति सदा रिष्टं पतिं विरक्ता यथा युवतिः १२ राहुः
स्त्रिषष्ठलाभे लग्नात्सौम्यैर्निरीक्षितः सद्यः नाशयति सर्वदुरितं मारुत इव तूलसंघा
तं १३ शीर्षोदयेषु सर्वे गगनाधिवासिनः स्थितो प्रकृतिस्थैश्चारिष्टं विलीयते घृत
मिवाग्निसंस्थं १४ तत्कालेयदि विजयी शुभग्रहः शुभनिरीक्षितो वाच्यः नाशयति स
वरिष्टान्मारुत इव पादपान्प्रबलः १५ सर्वैर्गगनभ्रमणैश्चंद्रो विनाशयत्यरिष्टं आ
पूर्यमानमूर्तिर्यथा नृपः प्रशमयति द्विषतः १६ अजवृषकर्किविलग्ने रक्षति राहुः
समस्तपीडाभ्यः पृथ्वीपतिः प्रसन्नः कृतापराधं यथा पुरुषं १७ गुरो मंगौ च केंद्रस्थो
जीवेद्वर्षशतं नरः माता रिष्टं छिनत्ति पाशुपिता रिष्टं तथैव च १८ किं कुर्वंति ग्रहाः
सर्वे यस्य केंद्रे बृहस्पतिः मत्तमातंगयूथानां हरत्येको पि केशरी १९ इति श्रीमद्

८

राहमिहराचार्यविरचितायां लघुजातकेऽरिष्टभंगाध्यायः षष्ठः ॥ ६ ॥ अथायुर्दायाध्यायः
नक्षत्रेषु गतघटिकाः नवत्या ९० पानपं हृतपः शेषा वेदहृता ४ लब्धं वर्त्तिमा २ जीवितं स्फु
टं १ राश्यंशकलागुणिताः द्वादशनवभिर्ग्रहस्य भगणेभ्यः द्वादशहृतावशेषेऽब्दमा
सदिननाडिकाः क्रमशः २ होरादयोप्येवं बलगुणान्यानि राशितुल्यानि वर्षाणि सं
मयछं सनुपाताश्चांशकादिफलं ३ वर्गोत्तमास्वराशिद्रेष्काणनवांशके द्विगुणं व
क्रोच्चयोस्त्रिगुणं द्वित्रिगुणत्वे सकृत्त्रिगुणं ४ शत्रुक्षेत्रेऽप्यंशं नीचेऽर्द्धं सूर्यलुप्तकि
रणाश्च क्षपयंति स्वादायुः नास्तं जातौ रविजभृगू ५ सर्वार्द्धत्रिचतुर्थं द्विय
तु भागान्व्ययाद्यरं सच्छुभाः संतोर्द्धमतो वामं बलवानेकर्क्षगेष्वेवं ॥ ६ ॥ इति श्रीम
द्वराहमिहरविरचितायां लघुजातके आयुर्दायाध्यायः सप्तमः ॥ ७ ॥ अथदशां

८

16

भवेत् २

तद्दशाध्यायः शोध्यः क्षेपविशुद्धः कालो येन जीवितेदत्तः सविचिंत्यस्तस्य दशास्व
दशोऽस्तु फलप्रदास्ते च १ लग्नार्कचंद्रा शंकानां यो बलवांस्तद्दशा प्रथमा तत्केंद्रपणफरा
पोक्लिमोपगानां बलाच्छेषाः २ मित्रोच्चस्वगृहांशोपगतानां शोभनादशाः सर्वाः स्वोच्चा
मिलोषिनामपि न तु कथितविपर्ययस्थानां ३ लग्नदशाद्युभालेः ५ जितमध्याधमाश्च
रेक्रमशः द्विशरीरे नैव विपरीताः स्थिरे चपापे ष्टमेध्यफलाः ४ एकर्क्षे द्वि त्र्यंशत्रिको
णयोः सप्तमे तु सप्तमांशे चतुरस्रयोस्तु पादं पाचयतिगतो ग्रहः स्वगुणैः ५ भागाः
सदृशाच्छेदैर्विवर्जिताः संयुताः दशाछेदाः प्रत्यंशगुणकाराः पृथक्पृथक्चान्तर्दशा
स्ताः ६ भागादौ च सदा रूपं विन्यस्य सदृशैः हते नष्टछेदांशासंयोगैर्विंध्यादिष्ट
दशाफलं ७ रूपस्थानगतैरंशैराशस्थं संगुणीकृतं दशांतर्गताः प्रोक्ता नियेय

वनसूरिभिः ८ आदावंतर्दशापाके भवेनेवंतर्दशापाके ततः परं तु वक्ष्यं दशापातक्रमे
णतु ९ इति वराहमिहरविरचितायां लघुजातके दशांतर्दशाध्यायोऽष्टमः ८ अथाष्ट
कवर्गः ग्रहस्य राशेर्गोराशौ संचरतः षड्योगहस्थानेभ्यः आत्मीयस्थानलग्नस्थाना
च्छुभाशुभनिरूपणायाष्टकवर्गः १ अथ सूर्यस्य केंद्रायाष्टद्विनवस्वर्कः १ ४ ७ १०
११ ८ २ ९ स्वादार्किभौमयोश्च शुभः पट्सप्तायेषु ६ ७ १२ सिता खेडायधीधर्मगो ६
११ ५ ९ जीवात् २ उपचयगोर्कः ३ ६ १० ११ चंद्रादुपचयनवमायधीयुतः ३ ६
१० ११ ९ १२ ५ सौम्यात् लग्नादुपचयबंधुव्ययस्थितः ३ ६ १० ११ ४ १२ शोभनः
प्रोक्तः २ अथ चंद्रस्य शत्रयुपचयेषु ३ ६ १० ११ लग्नात्साधनुनी १ ७ स्वात्कुजा
त्सनवधीस्थः ९ ५ सूर्यात्साष्टस्मरगः ३ ६ १० ११ ८ ७ विषडायसुतेषु ३ ६ ११ ५ स

धस्तुतात् ४ ज्ञात्केंद्रत्रिसुतायाष्टगो १ ४ ७ १० ३ ५ ११ ८ गुरोर्व्ययायमत्सुकेंद्रे १२ ११
८ १ ४ ७ १० षु त्रिचतुःसुतनवदशासमायगः ३ ४ ५ ९ १० ७ ११ चंद्रमोभुजात् ५
अथ भौमस्य भौमः स्वादायस्वाष्टकेंद्रगः ११ २ ८ १ ४ ७ १० आयषट्सुतेषु ३ ११ ६ ५
बुधात् जीवाद्दशायदशान्त्यये ६ ११ १० १२ षिनादुपचयसु ३ ६ १० ११ ५ षु ६ उदया
दुपचयतनुषु ३ ६ १० ११ १ त्रिषडाये षिंदुतः ३ ६ ११ समोदशमः १० न्तगुणोंत्यषडाष्ट
ये १२ ६ ८ ११ षसितात्केंद्रायनववसुषु १ ४ ७ १० ११ ९ ८ ७ अथ बुधस्य सौम्यो.
ष्यषल्लावायात्मजे १२ ६ ९ ११ ५ षिनात्स्वाच्चितनुदशायुते १२ ६ ९ ११ ५ ३ १ १० षु चं
द्रोद्विरिपुदशायाष्टसुखगतः २ ६ १० ११ ८ ४ सादिषु २ ६ १० ११ ८ ७ १ विलग्नात् ८
प्रथमसुखायद्विनिधनधर्मेषु १ ४ ११ २ ८ ९ सितात्त्रिधीः ३ ५ समेतेषु साज्ञास्मरेषु

थायसुतापोक्लिमेषु११ ५ ७ ९ ९ १२ कुजात् १२ अथशनेः स्वात्सौरिस्त्रिसुतायारिगः ३ ५ १ १ ६
१ ४ ११ २ ८ ९ १० ७ सौरारयोर्व्ययायारिवसुषु१२ ११ ८ ६ गुरोः ६ जीवो भौमा
द्धयाष्टकेंद्रगोर १२ ८ १ ४ ७ १०५ कील्सधर्मसहजे२ ११ ८ १ ४ ७ १० ६ बुधु स्वा
त्सेत्रिकेषु२ ११ ८ १ ४ ७ १० शुक्रात्नवदशलाभस्वधीरिषु ६ १० ११ २ ५ ६ पु ११
त्रात्रिनः स्मरत्रिकोणार्थलाभगः ७ ९ ५ २ ११ स्त्रिरिपुधीव्ययेषु ३ ६ ५ १२ यमात्
नवदिक्सुस्वाद्यधीस्वायशत्रुषु९ १० ४ १ ५ २ ११ ६ आत्सकामगो ९ १० ४ १ ५ २ ११
६ ७ लग्नात् ११ अथशुक्रस्य शकोलग्नादासुतनवाष्टलाभेषु१ २ ३ ४ ५ ९ ८ ११
६ ७ लग्नात् ११ अथशुक्रस्य ... कोलग्नादासुतनवाष्टलाभेषु१ २ ३ ४ ५ ९ ८ १० रविसु
सव्ययः १ २ ३ ४ ५ ९ ८ ११ १२ चंद्रात् स्वात्साद्येषु१ २ ३ ४ ५ ६ ८ ११ १२ वस्वेस्वायेष ८ १२ ११ षुकोन्नेव
तात्रिधीसुस्वास्निनवकर्मरंध्रे ३ ५ ४ ११ ६ १० ८ षु१२ वस्वेस्वायेष १२ ११ षुकोन्नेव
दिग्लिाभाष्टधीस्वो९ १० ११ ८ ५ जीवात् सौत्रिसुतनवायारि ३ ५ ९ ११ ६ कुजादस
कर्मसहिते३ ५ ११ ६ १२ १० षु स्वायाष्टकेंद्रगोर ११ ८ १ ४ ७ १० कोन्युक्रासष्टोय

१०

20

ला मे ६ १२ ११ १४ शिष्टआयगः ३ ६ ११ रारांकादुदयात्सुखाद्यकमगो ३ ६ ११ ४ १ १० थगुरोः सुतषड्व्ययायगो ५ ९ १२ ११ सौम्यायरिपुदिग्नवाष्ट १२ ११ ६ १० ९ ८ स्थः १५ विलग्नाथाश्रितराशितो भवंति रेखाः खलु यत्र तत्र विलग्नतस्तस्य च तत्र राशौ संस्थापनीया सुधिया क्रमेण १६ स्थानेषु तेषु शुभाः शेषेषु हिता भवंति चाष्टानां अशुभशुभविशेषफलं ग्रहाः प्रयच्छंति चारगताः १७ इति श्रीमद्वराहमिहराचार्यविरचितायां लघुजातके ऽष्टकवर्गाध्यायो नवमः ९ अथ प्रकीर्णाध्यायः ॥ रविवर्ज्जं द्वादशगैरनफा चंद्राद्द्वितीयगैः सुनफा उभयस्थितैर्दुरधुरा केमद्रुमसंज्ञकोतोन्यः १ सच्छीलं विषयसुखान्वितं प्रभुं ख्यातियुक्तमनफायां सुनफायां धीधनकीर्तियुक्तमात्मार्जितैश्वर्यं २ बहुभृत्यकुटुंबारंभं नित्यमुद्विग्नमपि दुरुधुराख्ये भृत्यकं दुःखितमधनं जातं केमद्रुमे वि

११

घातु ३ भौमश्चारश्यं जो महाधनो ज्ञानवानु घोनिपुणः ॥ केंद्रः शुक्रः सुखितो
गुरुर्गुणाढ्यो नृपतिपूज्यः ४ वक्रारं भः सौरो बहुमन्त्रयः पूजितो गुणैर्द्वः ॥ भंबो गुणैः
समगुणास्यैयायो गोद्भवाः पुरुषाः ५ सूर्याद्द्वितीयमृक्षं वैशिस्थानं प्रकीर्तितं यवनैः ॥
तच्चे ह्यग्रहस्तुतं जन्म निचेष्टासुचविलग्नं ६ ७ अथद्विग्रहयोगः ॥ ७ यंत्रक्षं पापर
तं निपुणं क्रूरं चरास्त्रवृत्तिं च धातुसंश्यच्चमश्चंद्रादिभिरन्वितः सूर्यः ॥ ७ चंद्रांगार
कपूर्वैः कूटस्य प्रस्तनकं कुलाभ्यधिकं वस्त्रव्यवहारदंते मेलपानमेवं चैव ८ मल्लुरक्ष
कं परदाररता लंदुःखान्वितं कुजोज्ञोद्यैः ॥ ज्ञोजीवाद्यैर्यशोवाग्मीसाहं कुआलसः ॥ ९ जी
वः सितेन बहुगुणमसितेन समन्वितोथ घटकारं स्त्रीधनमसितेन सितस्त्रिभिरप्येवं
फलानि वदेत् १० अथ प्रव्रज्यायोगः ॥ चतुरादिभिरेकस्थैः प्रव्रज्यां स्वां ग्रहः करोति

११

बली बहुवीर्यैस्तावंस्यः प्रथमवीर्याधिकश्चैव ११ तापसवृद्धश्रावकरक्तपटाजीविभि
क्षुचरकानां निर्ग्रंथीनां चार्काद्यैराजितैः प्रच्युतिर्बलिभिः १२ दिनकरलुप्तमयूखैरदी
क्षितानाभक्ति वादिनस्तेषां याचितदीक्षाबलिभिः पराजितैरन्यदृष्टैर्वा १३ अथराशिशी
लः अस्थिरविभूतिमित्रंचलमटनंसुवलितनियमममपिचरभे स्थिरभेतद्विपरीतं क्ष
मान्वितंदीर्घसूत्रंच १४ द्विशरीरेत्यागयुतेद्यतत्समुत्साहिनौविधचेष्ट आम्यारएयजलो
द्भवराशिषुराशिषुजातास्तथाशीलाः १५ अथदृष्टिफलं क्षेत्राधिपसंदृष्टेराशिनिन
पस्तत्सुहृद्भिरधिपैवान् द्वेः काणांत्राकृपैर्वाप्रायःसौम्यैः शुभं नान्यैः १६ अथभावप्र
करणं पुष्टंतिशुभाः भावान्मूर्त्यादीन्घ्नंतिसंस्थिताः पापाः सौम्याः षष्ठेरिष्ठाः सर्वेने
ष्टाव्ययाष्टमगाः १७ कर्किवृषाजोपगतेचंद्रेलग्ने धनीसुरूपश्च विकलांगजडदरि
पिधानं३ वि

५

द्राः शेषेषु विशेषतः क्लेशो ॥१८॥ विकलेक्षणो ऽर्कलग्ने तैमिरिको ऽजे स्वभे तु रात्र्यंधः ॥ बु
द्बुदृष्टिः कर्किणि काणो व्ययगे शशांकेवा ॥१९॥ दृष्टे पाद विवर्ज्या मित्रस्वगृहत्रिकोणतुंगे
षु रिपुभैन्यफलमर्कोपगतश्च पापफलं चैव ॥२०॥ अथ राजयोगः ॥ नेस्कर भोक्तावि
चक्षणधनीन्द्रपतिनृपुंशकाकामयदारिद्राः ॥ खलपापोयो क्लिष्टा मेषादीनां नवांशकभ
वाः २१ कुलतुल्यकुलाधिकबंधुमान्यधनीभोगिनृपसमनरेंद्राः ॥ स्वर्क्षगतैः कवि
रुक्ष्याकिंचिन्न्यूनाः सुहृद्गृहगेः ॥२२॥ त्रिप्रभृतिभिरुच्चस्थैर्नृपवंशभवाः भवंतिराजा
नः पंचादिभिरन्यकुलोद्भवाः स्वस्वत्रिकोणगृहगैर्वा २३ निर्धधैनदुःखितमूढव्या
धितवधाभितसवधभाजः ॥ एकोत्तरपरिवृद्ध्या नीचगतैः शत्रुगृहगैर्वा ॥२४॥ एको
पि नृपजन्मदो ग्रहः स्वोच्चगतः सुहृद्दृष्टः ॥ बलिभिः केंद्रोपगतैस्त्रिप्रभृतिभिरवनि

१२

१२

पालभवः २५ वर्गोत्तमगते चंद्रे चतुराद्यैर्वीक्षिते विलग्ने वा ॥ नृपजन्म भवति राज्यं
नृपयोगे बलयुतदशायां २६ शास्त्रियोगसमागमरात्रिशीलसंदर्शनानि भावाश्च
आश्रयराज्यप्रभावाश्च्याध्यायेस्मिन्नक्रमेणोक्ताः २७ इति श्रीमद्वराहमिहिरविरचि
तायां श्रीलघुजातके प्रकीर्णाध्यायो दशमः १० ॥ अथ नाभसयोगाध्यायः ७
केंद्रत्रयगैः पापैः शुभैर्दलाख्यौ वहिश्च माला च सर्वैश्चतुःखितानां मालायां ज
न्मसुखिनोच २ चरभवनादिषु सर्वै राश्रयजाररज्जुमुसलनलाख्ययोगाः ॥ ईर्षुर्म
नी धनवान् क्रमेण कुलविश्रुताः सर्वे १ ॥ इति दलयोगौ २ ॥ ७ द्विरनंतरकेंद्र
स्थैर्गदं विलग्नास्तसंस्थितैः शकटं खचतुर्थयोर्विहंगः शृंगाटकमुदयसुतनवमैः
२ लग्नान्यगतैर्ग्रहैश्च हलमेतेषां क्रमात्फलोपनयः ॥ यज्ञार्थकटोजीविहूता

१२

श्चिरसौख्यभाक्पुरुषो विहृतः ॥ ४ ॥ क्रूरैः सुखकर्मस्थैः सौम्यैरुदयास्तसंस्थितैर्वज्रं ॥ यवइति
तद्विपरीतैर्मिश्रैः कमलं च्युतैर्वापी ॥ ५ ॥ लग्नादिकंटकेभ्यश्चतुर्गृहान्तरस्थितैर्योगाः ॥
यूपेषुशक्तिदंडाः वज्रादीनां फलान्यस्मात् ॥ ६ ॥ आद्यंतयोः सुखयुतः सुखभाक् मध्ये
धनान्वितोऽल्पसुखः त्यागी हिंस्रो धनवर्जितः [illegible] विपुलश्च ॥ ७ ॥ तद्वत्समस्तऋक्ष
स्थैर्नौकूटछत्रकार्मुकानि स्युः ॥ नाग्रेरप्येवं कंटकाद्बहिस्थितैः स्मृतोर्द्धशशी ॥ ८ ॥
एकांतरैर्विलग्नात्षड्भवनावस्थितैश्चक्रं ॥ अर्थात्तद्वदुदधिर्नौप्रभृतिफलानि
समानि ॥ ९ ॥ कीर्त्यायुक्तोन्नतवाक् स्वजनहितः स्तरः सुभगो धनी भूपः इत्याकृतिजा
विंशतिरात्मगुणैस्तेषु नंदते ॥ १० ॥ ७ ॥ अथ संख्यायोगाः ॥ एकादिगृहोपगतैरुक्तान्यये
गान्विहाय संख्यायाः ॥ गोलयुगशूलकेदारपाशदामाख्यवीणाः स्युः ॥ ११ ॥ दुःखितद

१२

रिद्रघातकाः स्तृषिकरदुःशीलपशुपनिपुणानां जन्मक्रमेण सुखिनः परभाग्येसर्वएवैते
१२ इतिनाभसयोगाः ७ अथस्त्रीजातकाध्यायः स्त्रीपुंसोर्जन्मफलं तुल्यं किंत्वत्र
वीचंद्रलग्नस्थं तद्बलयोगाद्वपुराकृतिश्च सौभाग्यमस्तमये १ युग्मर्क्षे लग्नेंद्वोः स्त्री
प्रकृतिः स्याद्रूपशीलगुणयुक्ता ओजे पुरुषाकारादुःशीला दुर्भगाचैव २ अबले
ससमभवने सौम्येक्षणवर्जिते च कापुरुषः भवतिपतिश्चरभेस्तेप्रवासशीलो भव
ति भर्त्ता ३ बाल्ये विधवा भौमे पतिसंत्यक्तादिवाकरे स्तेस्थे सौरे पापेदृष्टे कन्यैव जरां
समुपयाति ४ सितकुजजीवेंदुसुतैर्बलिभिर्लग्नेसमश्च यदिराशिः स्त्रीब्रह्मवा
दिनी स्याद्भूरि शास्त्रकुशलाप्रतीताच ५ पुंजन्मफलं यन्न घटति वनितासु पतिषु
तत्तासां वक्तव्यं राज्याराज्याद्यं वक्षणविनाशादि वा पापं ६ इतिस्त्रीजातकाध्यायः

अथ निर्याणाध्यायः ६७ सूर्यादिभिर्निधनगैर्हुतवहसलिलायुधज्वरामयजः क्षुत्तृट्कृतश्च मृत्युः परदेशे निधने चरभे १ यो बलवान् निधनं पश्यति तद्धातुकोपजो भवेन्मृत्युः लग्नद्रेष्काणपतिर्वा द्वाविंशः कारणं मृत्योः २ सुरपितृतिर्यङ्नरकान् गुरुरुडुपसितावसृग्रवीज्यौ सौम्यौ रिपुरंध्रत्र्यंशाद्वा करोति चास्तारि निधनस्थाः ३ षष्ठाष्टमकेंद्रगतो गुरुरुच्चो भवति मीनलग्ने वा शेषैर्बलैर्जन्मनि मरणे वा मोक्षगतिमाहुः ४ इति सर्वेषु गतियोगः ६७ गुरुरुडुपतिशुक्रौ सूर्यभौमौ यमज्ञौ विबुधपितृतिरश्चो नारकीयांश्च कुर्युः ॥ दिनकरशशिवीर्याधिष्ठितांत्र्यंशनाथाः प्रवरसमनिकृष्टातुंगह्रासादनूके ५ ॥ इति निर्याणाध्यायः ॥ ६७ ॥ अथ नष्टजातकाध्यायः ॥ ६७ ॥ गोसिंहौ जितुमाष्टमौ क्रियतुलकन्यामृगो चक्रमात्संवर्ग्याः दशकाष्टसप्तविषयैः शो

९४

९४

न्रोषाः स्वसंख्यागुणाः॥ जीवाशास्फुजिदैंदवाः प्रथमवच्छेषाः ग्रहाः सौम्यवद्राशी
नां नियतो विधियहःसु तैः कार्याश्च तद्गुणाः॥ १ ॥ समाहतं त्रिघनभाजितं शेषमक्षंद
त्याथवा नविशो ध्यनवाथ वास्मात्॥ एकं कलत्रसहजात्मजशत्रुभेभ्यः प्रष्टुर्वदेदुदय
राशिवशेन तेषां॥ २ ॥ वर्षर्तुमासतिथयो द्युनिशंस्यहूनि वेलोदयर्क्षनवभागविकल्प
नाद्याः॥ भूयो दशादिगुणिताः स्वविकल्पभक्ताः वर्षादयो नवकदानविशोधनाभ्यां
॥ ३ ॥ विप्ते यादृशेकेष षष्ठाः ऋतुमासास्तथैव च॥ अष्टकेषु च मासार्द्धे तिथयश्च तथा स्मृताः
॥ ४ ॥ दिवारात्रिप्रसूतिं च नक्षत्रानयनं तथा सप्तकेषु च वर्गेषु नित्यमेवोपलक्ष्यते ॥ ५ ॥ वेला
मथ विलग्नं च होरामंशकमेव च॥ पंचकेष्वेव जानीयान्नष्टजातकसिद्धये॥ ६ ॥ संस्कारन
ममात्रा ह्रितुगणा छायांगुलैः समासुक्ताः॥ त्रिनवकभक्ता शेषं नक्षत्रं भवेद्धनिष्ठादि

॥७ इति नष्टजातकमिदं बहुप्रकारं मया विनिर्दिष्टं ॥ ग्राह्यमतः सच्छिष्यैः परीक्ष्य यत्नाद्यथा भवति ॥ ८ ॥ इति श्रीमद्वराहमिहिराचार्यकृते लघुजातके नष्टजातको नाम चतुर्दशोध्यायः ॥ ७ ॥ ७ ॥ ७ ॥ समाप्तं ॥ शुभमस्तु ॥ संवत् १८३२ शाके १६९७ वर्षे मन्मथ नामसंवत्सरे पौषमासे कृष्णपक्षे तिथौ नवमी सहद्दशम्यां सोमवासरे लिखितमिदं पुस्तकं अवधानी सुपनामक श्रीमद्धर्मदेवशात्मज श्रीनरसिंहदेवस्य सूनुनारदाशिवेन स्वपठनार्थं परोपकारार्थं च ॥ ७ ॥ ७ ॥ ७ ॥ श्री लक्ष्मीनरसिंहाय नमः ॥ ७ ॥

लघुजातक पत्र १५